श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये उत्तरकाण्डे

# ॥ चतुर्थः सर्गः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

## श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

# ॥ चतुर्थः सर्गः ॥

## राक्षसवंशवर्णनं हेतिविद्युत्केशसुकेशानामुत्पत्तिः

श्रुत्वागस्त्येरितं वाक्यं रामो विस्मयमागतः।
कथमासीत् तु लङ्कायां सम्भवो रक्षसां पुरा ॥ **7.4.1** ॥

ततः शिरः कम्पयित्वा त्रेताग्निसमविग्रहम्।
तमगस्त्यं मुहुर्दृष्ट्वा स्मयमानोऽभ्यभाषत ॥ **7.4.2** ॥

भगवन् पूर्वमप्येषा लङ्काऽऽसीत् पिशिताशिनाम्।
श्रुत्वेदं भगवद्वाक्यं जातो मे विस्मयः परः ॥ **7.4.3** ॥

पुलस्त्यवंशादुद्भूता राक्षसा इति नः श्रुतम्।
इदानीमन्यतश्चापि सम्भवः कीर्तितस्त्वया ॥ **7.4.4** ॥

रावणात् कुम्भकर्णाच्च प्रहस्ताद् विकटादपि।
रावणस्य च पुत्रेभ्यः किं नु ते बलवत्तराः ॥ **7.4.5** ॥

क एषां पूर्वको ब्रह्मन् किंनामा च बलोत्कटः।
अपराधं च कं प्राप्य विष्णुना द्राविताः कथम् ॥ **7.4.6** ॥

एतद् विस्तरतः सर्वं कथयस्व ममानघ।
कुतूहलमिदं मह्यं नुद भानुर्यथा तमः ॥ **7.4.7** ॥

राघवस्य वचः श्रुत्वा संस्कारालङ्कृतं शुभम्।
अथ विस्मयमानस्तमगस्त्यः प्राह राघवम्॥ **7.4.8** ॥

प्रजापतिः पुरा सृष्ट्वा अपः सलिलसम्भवः।
तासां गोपायने सत्त्वानसृजत् पद्मसम्भवः॥ **7.4.9** ॥

ते सत्त्वाः सत्त्वकर्तारं विनीतवदुपस्थिताः।
किं कुर्म इति भाषन्तः क्षुत्पिपासाभयार्दिताः॥ **7.4.10** ॥

प्रजापतिस्तु तान् सर्वान् प्रत्याह प्रहसन्निव।
आभाष्य वाचा यत्नेन रक्षध्वमिति मानद॥ **7.4.11** ॥

रक्षाम इति तत्रान्यैर्यक्षाम इति चापरैः।
भुङ्क्षिताभुङ्क्षितैरुक्तस्ततस्तानाह भूतकृत्॥ **7.4.12** ॥

रक्षाम इति यैरुक्तं राक्षसास्ते भवन्तु वः।
यक्षाम इति यैरुक्तं यक्षा एव भवन्तु वः॥ **7.4.13** ॥

तत्र हेतिः प्रहेतिश्च भ्रातरौ राक्षसाधिपौ।
मधुकैटभसङ्काशौ बभूवतुररिन्दमौ॥ **7.4.14** ॥

प्रहेतिर्धार्मिकस्तत्र तपोवनगतस्तदा।
हेतिर्दारक्रियार्थे तु परं यत्नमथाकरोत्॥ **7.4.15** ॥

स कालभगिनीं कन्यां भयां नाम महाभयाम्।
उदावहदमेयात्मा स्वयमेव महामतिः॥ **7.4.16** ॥

स तस्यां जनयामास हेती राक्षसपुङ्गवः।
पुत्रं पुत्रवतां श्रेष्ठो विद्युत्केशमिति श्रुतम्॥ **7.4.17** ॥

विद्युत्केशो हेतिपुत्रः स दीप्तार्कसमप्रभः।
व्यवर्धत महातेजास्तोयमध्य इवाम्बुजम्॥ **7.4.18** ॥

स यदा यौवनं भद्रमनुप्राप्तो निशाचरः।
ततो दारक्रियां तस्य कर्तुं व्यवसितः पिता ॥ **7.4.19** ॥

सन्ध्यादुहितरं सोऽथ सन्ध्यातुल्यां प्रभावतः।
वरयामास पुत्रार्थं हेती राक्षसपुङ्गवः ॥ **7.4.20** ॥

अवश्यमेव दातव्या परस्मै सेति सन्ध्यया।
चिन्तयित्वा सुता दत्ता विद्युत्केशाय राघव ॥ **7.4.21** ॥

सन्ध्यायास्तनयां लब्ध्वा विद्युत्केशो निशाचरः।
रमते स तया सार्धं पौलोम्या मघवानिव ॥ **7.4.22** ॥

केनचित्त्वथ कालेन राम सालकटङ्कटा।
विद्युत्केशाद् गर्भमाप घनराजिरिवार्णवात् ॥ **7.4.23** ॥

ततः सा राक्षसी गर्भं घनगर्भसमप्रभम्।
प्रसूता मन्दरं गत्वा गङ्गा गर्भमिवाग्निजम्।
समुत्सृज्य तु सा गर्भं विद्युत्केशरतार्थिनी ॥ **7.4.24** ॥

रेमे तु सार्धं पतिना विस्मृत्य सुतमात्मजम्।
उत्सृष्टस्तु तदा गर्भो घनशब्दसमस्वनः ॥ **7.4.25** ॥

तयोत्सृष्टः स तु शिशुः शरदर्कसमद्युतिः।
निधायास्ये स्वयं मुष्टिं रुरोद शनकैस्तदा ॥ **7.4.26** ॥

ततो वृषभमास्थाय पार्वत्या सहितः शिवः।
वायुमार्गेण गच्छन् वै शुश्राव रुदितस्वनम् ॥ **7.4.27** ॥

अपश्यदुमया सार्धं रुदन्तं राक्षसात्मजम्।
कारुण्यभावात् पार्वत्या भवस्त्रिपुरसूदनः ॥ **7.4.28** ॥

तं राक्षसात्मजं चक्रे मातुरेव वयःसमम्।
अमरं चैव तं कृत्वा महादेवोऽक्षरोऽव्ययः॥ **7.4.29** ॥

पुरमाकाशगं प्रादात् पार्वत्याः प्रियकाम्यया।
उमयापि वरो दत्तो राक्षसीनां नृपात्मज॥ **7.4.30** ॥

सद्योपलब्धिर्गर्भस्य प्रसूतिः सद्य एव च।
सद्य एव वयःप्राप्तिर्मातुरेव वयःसमम्॥ **7.4.31** ॥

ततः सुकेशो वरदानगर्वितः
श्रियं प्रभोः प्राप्य हरस्य पार्श्वतः।
चचार सर्वत्र महान् महामतिः
खगं पुरं प्राप्य पुरन्दरो यथा॥ **7.4.32** ॥

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
उत्तरकाण्डे चतुर्थः सर्गः॥